# ஸ்ரீ சங்கரஜயந்தி மஹோத்ஸவம்

## பூஜாவிதானமும் உத்ஸவம் நடத்தும் முறையும்

பூர்ணகும்பந்திற்குள் தான்யம் நிறைந்து அதன் மேலுள்ள தேங்காயின் பக்கத்தில் ஸ்ரீ ஆசார்ய பிரதியையை சாத்திவைத்து மனதால் 'சங்கராய நம:' என்று ஆவாஹனம் செய்து சந்தனம், புஷ்பம், தூபம், தீபம், பால் பழ நைவேத்யம் இவைகளைக்கொண்டு காலையில் பூஜிக்க வேண்டும்.

சௌகரியப்பட்டால் தெரிந்தவர்களைக்கொண்டு கீழ்வரும் 24 அர்ச்சனைகளை புஷ்பங்களைக்கொண்டு செய்யலாம். அர்ச்சனை நைவேத்யமான பிறகு--

ஜயஜய சங்கர ஜகத்குரோ ஜயஜய ஜயஜய ஹாரதீ என்று கர்பூரஜோதி காட்டலாம்.

ஸ்ரீ சங்கர ஜயந்தியன்று கற்பூரஹாரதி காட்டின பிறகு ஸ்ரீ ஆசார்ய அவதார கட்டத்தைப் பாராயணம் செய்து விரைதானம் செய்யலாம்.

### ஸ்ரீ சங்கர பகவத்பாதாசாரியாள் அவர்களின் அவதார கட்டம்

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ।।
मुदा करात्तमोदकं सदा विमुक्तिदायकं कलाधरावतंसकं विलासिलोकशङ्करम् ।
अनायकैकनायकं विनाशितेभदैत्यकं नताशुभाशुनाशकं नमामि तं विनायकम् ।।
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः । गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ।।



नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ।।
श्रीशङ्करचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम् ।
तं तोटकं वार्तिककारमन्यानस्मद्गुरून् सन्ततमानतोऽस्मि ।।
श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ।।

।।श्रीरस्तु।।

## ।। श्रीमच्छङ्करभगवत्पादाचार्याणाम् अवतार घट्टः ।।

### (श्रीचिद्विलासीयश्रीशङ्करविजयविलासे)

व्यराजत तदार्याम्बा शिवैकायतचेतना । दृष्टवा शिवगुरुर्यज्वा भार्यामार्यां च गर्भिणीम् ।।
वृषाचलेशं सततं स्मरन्नेकाग्रचेतसा । दयाळुतां स्तुवन् शम्भोर्दीनेष्वपि महत्स्वपि ।।
ववृधे स पयोराशिः पूर्णेन्दोरिव दर्शनात् । ततः सा दशमे मासि सम्पूर्णशुभलक्षणे ।।
दिवसे माधवर्तौ च स्वोच्चस्थे ग्रहपञ्चके । मध्याह्ने चाभिजिन्नाममुहूर्ते चार्द्रया युते ।।
उदयाचलवेलेव भानुमन्तं महौजसम् । प्रसूता तनयं साध्वी गिरिजेव षडाननम् ।।
जयन्तमिव पौलौमी व्यासं सत्यवती यथा । तदैवाग्रे निरीक्ष्येयमनुभूयेव वेदनाम् ।।
चतुर्भुजमुदाराङ्गं त्रिणेत्रं चन्द्रशेखरम् । दुर्निरीक्ष्यैः स्वतेजोभिर्भासयन्तं दिशो दश ।।
दिवाकरकराकारगौरैरीषद्विलोहितैः । एवमाकारमालोक्य विस्मिता विह्वला भिया ।।
किं किं किमिदमा चर्यमन्यदेव मदीप्सितम् । परं त्वन्यत्समुद्भूतमिति चिन्ताभृति स्वयम् ।।
उद्वीक्षन्त्यां प्रणमितं तस्यां कुतुकतायुजि । ससृजुः पुष्पवर्षाणि देवा भुव्यन्तरिक्षगाः ।।
कल्हारकलिकागन्धबन्धुरो मरुदाववौ। दिशः प्रकाशिताकाशाः सा धरा सादरा बभौ।।
प्रायः प्रदक्षिणज्वाला जज्वलुर्यज्ञपावकाः । प्रसन्नमभवच्चित्तं सतां प्रतपतामपि ।।
इत्थमन्यद्विलोक्यापि प्रश्रिता विनयान्विता । वृषाचलेशं निि चित्य प्रादुर्भूतमतन्द्रिता ।।
स्वामिन् दर्शय मे लीलां बालभावक्रमोचिताः । इत्थं सा प्रार्थयामास साध्वी भूयो महेश्वरम् ।।
ततः किशोरवत्सोऽपि किञ्चिद्विचलिताधरः । ताडयन् चरणौ हस्तौ रुरोदैषः क्षणादसौ ।।
आर्या साऽपि तदैवाससीन्मायामोहितमानसा । जगन्मोहकरी माया महेशितुरनीदृशी ।।
तत्रत्यास्तु जना नार्यो नाविन्दन् वृत्तमीदृशम् । बालकं मेनिरे प्रोद्यदिन्दुबिम्बमिवोज्ज्वलम् ।।
तत्रत्या वृद्धनार्योऽपि यथोचितमथाचरन् । ततः श्रुत्वा पिता सोऽपि निधिं प्राप्येव निर्धनः ।।
मुमुदे नितरां चित्ते वितेशं नाभ्यलक्ष्यत । आविर्भावं तु जानाति शम्भोर्नाबोधयच्च सा ।।
स्नात्वा शिवगुरुर्यज्वा यज्वनामग्रणीस्ततः । विमानाकरायामास पुरन्ध्रीरपि सर्वतः ।।
तदोत्सवो महानासीत्पुरे सद्मनि सन्ततम् । धान्यराशिं मखिभ्योऽसौ विद्भ्यो भूयः प्रदत्तवान् ।।
धनानि भूरि विप्रैभ्यो वेदविद्भ्यो दिदेश सः । वासांसि भूयो दिव्यानि सफलानि प्रदत्तवान् ।।
पुरन्ध्रीणां च नीरन्ध्रं वस्तुजातान्यदादसौ । घटोघ्नीर्बहुशो गाश्त सालङ्काराः सदक्षिणाः ।।
वृषाचलेशः सततं प्रीयतामित्यसौ ददौ । ततः शिवगुरुर्यज्वा ब्राह्मणान् पूर्वतोऽधिकम् ।।
सन्तर्प्य बन्धुभिः सार्धं मुदितो न्यवसत्सुधीः । बालभावे विशालाक्षमतिविस्तृतवक्षसम् ।।
आजानुलम्बितभुजं सुविशालनिटालकम् । आरक्तोपान्तनयनविनिन्दितसरोरुहम् ।।

मुखकान्तिपराभूतराकाहिमकाकृतिम् । भासा गौर्या प्रसृतया प्रोद्यन्तमिव भास्करम् ।।
शङ्कचक्रध्वजाकाररेखाचिह्नपदाम्बुजम् । द्वात्रिंशल्लक्षणोपेतं विद्युदाभकळेबरम् ।।
प्रमोदं दृष्टमात्रेण दिशन्तं तं स्तनंधयम् । पायं पायं दृशा प्रेम्णा श्रीकृष्णमिव गोपिका ।।
प्रपेदे न क्षणं तृप्तिं चकोरीव सुधाकरम् । तादृशं बालकं दृष्ट्वा त्वार्याम्बा शुभलक्षणम् ।।
तिष्ठति स्म सुखेनैव लालयन्ती तनूभवम् ।।

## அர்ச்சனை நாமாவளி

१. अष्टवर्षचतुर्वेदिने नमः
२. द्वादशाखिलशास्त्रविदे नमः
३. सर्वलोकख्यातशीलाय नमः
४. प्रस्थानत्रयभाष्यकृते नमः
५. पद्मपादादिसच्छिष्याय नमः
६. पाषण्डध्वान्त भास्कराय नमः
७. अद्वैतस्थापनाचार्याय नमः
८. द्वैतादिद्विपकेसरिने नमः
९. व्यासनन्दितसिद्धान्ताय नमः
१०. वादनिर्जितमण्डनाय नमः
११. षण्मतस्थापनाचार्याय नमः
१२. षड्गुणैश्वर्यमण्डिताय नमः
१३. सर्वलोकानुग्रहकृते नमः
१४. सर्वज्ञत्वादिभूषणाय नमः
१५. श्रुतिस्मृतिपुराणार्थाय नमः
१६. श्रुत्येकशरणप्रियाय नमः
१७. सकृत्स्मरणसन्तुष्टाय नमः
१८. शरणागतवत्सलाय नमः
१९. निर्व्याजकरुणामूर्तये नमः
२०. निरहंभावगोचराय नमः
२१. संशान्तभक्तहृत्तापाय नमः
२२. सर्वज्ञानफलप्रदाय नमः
२३. सदसद्वस्तुविमुखाय नमः
२४. सत्तासामान्यविग्रहाय नमः



।। श्रीः ।।

# ।। तोटकाष्टकं ।।

विदिताखिल शास्त्र सुधा जलधे महितोपनिषत्कथितार्थनिधे ।
हृदये कलये विमलं चरणं भव शंकर देशिक मे शरणं ।। १ ।।

करुणावरुणालय पालय मां भवसागरदुःखविदूनहृदम् ।
रचयाखिलदर्शनतत्वविदं भव शंकर देशिक मे शरणं ।। २ ।।

भवता जनता सुहिता भविता निजबोधविचारणचारुमते ।
कलयेश्वरजीवविवेकविदं भव शंकर देशिक मे शरणं ।। ३ ।।

भव एव भवानिति मे नितरां समजायत चेतसि कौतुकिता ।
मम वारय मोहमहाजलधिं भव शंकर देशिक मे शरणं ।। ४ ।।

सुकृतेऽधिकृते बहुधा भवतो भविता समदर्शनलालसता ।
अतिदीनमिमं परिपालय मां भव शंकर देशिक मे शरणं ।। ५ ।।

जगतीमवितुं कलिताकृतयो विचरन्ति महामहसश्छलतः ।
अहिमांशुरिवात्र विभासि गुरो भव शंकर देशिक मे शरणं ।। ६ ।।

गुरुपुङ्गव पुङ्गवकेतन ते समतामयतां नहि कोऽपि सुधीः ।
शरणागतवत्सल तत्वनिधे भव शंकर देशिक मे शरणं ।। ७ ।।

विदिता न मया विशदैककला न च किंचन काञ्चनमस्ति गुरो ।
द्रुतमेव विधेहि कृपां सहजां भव शंकर देशिक मे शरणं ।। ८ ।।

।। तोटकाष्टकं संपूर्णं ।।

श्री शङ्करो विजयते

# श्री चन्द्रशेखर गुरुस्तुति पञ्चकम्

शिवगुरुनन्दनशंकरशोभितकामपदांकितपीठपते
नृपजनवन्दित विश्वमनोहर सर्वकलाधर पूततनो ।
श्रुतिमतपोषक दुर्मतशिक्षक सज्जनरक्षक कल्पतरो
जय जय हे शशिशेखरदेशिक काञ्चिमठेश्वर पालय माम् ।।१।।

श्रीधर शशिधर भेदविकल्पनदोषनिवारणधीरमते
रघुपतिपूजितलिंगसमर्जनजातमनोहरशीलतनो ।
बहुविधपण्डितमण्डलमण्डितसंसदि पूजित वेदनिधे
जय जय हे शशिशेखरदेशिक काञ्चिमठेश्वर पालय माम् ।।२।।

हिमगिरिसम्भवदिव्यसरिद्वरशोभिशिरोवर भक्तिनिधे
निजसकलागमशास्त्रविमर्शक पण्डितमण्डलवन्द्यतनो ।
बुधजनरञ्जकदुर्जनमानसदोषनिवारकवाक्यरते
जय जय हे शशिशेखरदेशिक काञ्चिमठेश्वर पालय माम् ।।३।।

मधुसमभाषण दुर्मतशोषण सज्जनपोषण धीरमते
शुकमुनितातज सूत्रविमर्शक शंकरबोधितभाष्यरते ।
निगमसुलक्षणरक्षणपण्डितभास्वरमण्डलपोषक हे
जय जय हे शशिशेखरदेशिक काञ्चिमठेश्वर पालय माम् ।।४।।

रतिपतिसुन्दररूप मनोहर बुधजनमानससारस हे
तुहिनधराधरपुत्र्यभिमोहित कामकलेश्वर पूजक हे ।
कनकधराधरकार्मुकनन्दित कामकलादृढ भक्तिनिधे
जय जय हे शशिशेखरदेशिक काञ्चिमठेश्वर पालय माम् ।।५।।



## ।। श्रीजगद्गुरु काञ्ची कामकोटीपीठाधीश्वर श्रीमच्चन्द्रशेखरेन्द्रसरस्वती स्वामिपादाष्टोत्तरशतनामावळिः ।।

श्रीमठपाठः
श्री चन्द्रशेखरेन्द्रास्मदाचार्याय नमो नमः
श्री चन्द्रमौळीपादाब्जमधुपाय नमो नमः
आचार्यपादाधिष्ठानाभिषिक्ताय नमो नमः
सर्वज्ञाचार्य भगवत्स्वरूपाय नमो नमः
अष्टाङ्गयोग निष्ठा गरिष्ठाय नमो नमः
सनकादि महायोगि सदृशाय नमो नमः
महादेवेन्द्र हस्ताब्ज सञ्जाताय नमो नमः
महायोगि विनिर्भेद्य महत्त्वाय नमो नमः
कामकोटि महापीठाधीश्वराय नमो नमः
कलिदोषनिवृत्त्येककारणाय नमो नमः १०
श्रीशङ्कर पदाम्भोज चिन्तनाय नमो नमः
भारतीकृत जिह्वाग्र नर्तनाय नमो नमः
करुणारस कल्लोल कटाक्षाय नमो नमः
कान्ति निर्जित सूर्येन्दु कम्राभाय नमो नमः
अमन्दानन्दकृन्मन्दगमनाय नमो नमः
अद्वैतानन्दभरित चिद्रूपाय नमो नमः
कटीतटलसच्चारु काषायाय नमो नमः
कटाक्षमात्र मोक्षेच्छा जनकाय नमो नमः
बाहुदण्ड लसद्वेणु दण्डकाय नमो नमः
फालभाग लसद्भूति पुण्ड्रकाय नमो नमः २०
दरहास स्फुरद्दिव्य मुखाब्जाय नमो नमः
सुधामधुरिमा मञ्जु भाषणाय नमो नमः
तपनीय तिरस्कारि शरीराय नमो नमः
तपःप्रभावराजत्सन्नेत्राय नमो नमः
सङ्गीतानन्द सन्दोह सर्वस्वाय नमो नमः
संसारांबुधि निर्मग्न तारकाय नमो नमः
मस्तकोल्लासि रुद्राक्ष मकुटाय नमो नमः
साक्षात्परशिवामोघ दर्शनाय नमो नमः
चक्षुर्गत महातेजोऽत्युज्ज्वलाय नमो नमः
साक्षात्कृत जगन्मातृ स्वरूपाय नमो नमः ३०
क्वचिद्बालजनात्यन्तसुलभाय नमो नमः
क्वचिन्महाजनातीवदुष्प्रापाय नमो नमः
गोब्राह्मण हितासक्त मानसाय नमो नमः
गुरुमण्डल संभाव्य विदेहाय नमो नमः
भावनामात्र सन्तुष्ट हृदयाय नमो नमः
भाव्याद्य भाव्य दिव्य श्रीपदाब्जाय नमो नमः
व्यक्ताव्यक्ततरानेकचित्कलाय नमो नमः
रक्तशुक्लप्रभामिश्र पादुकाय नमो नमः
भक्तमानस राजीव भवनाय नमो नमः
भक्तलोचन राजीव भास्कराय नमो नमः ४०
भक्त कामलता कल्पपादपाय नमो नमः
भुक्ति मुक्ति प्रदानेकशक्तिदाय नमो नमः
शरणागत दीनार्त रक्षकाय नमो नमः
शर्मादि षट्क संपत्प्रदायकाय नमो नमः
सर्वदा सर्वथा लोकसौख्यदाय नमो नमः
सदा नवनवाकाङ्क्ष्य दर्शनाय नमो नमः
सर्व हृत्पद्म सञ्चार निपुणाय नमो नमः
सर्वेङ्गित परिज्ञान समर्थाय नमो नमः
स्वप्नदर्शन भक्तेष्ट सिद्धिदाय नमो नमः
सर्ववस्तु विभाव्यात्मसद्रूपाय नमो नमः ५०
दीनभक्तावनैकान्त दीक्षिताय नमो नमः
ज्ञानयोगबलैश्वर्यमानिताय नमो नमः
भावमाधुर्य कलितभयदाय नमो नमः
सर्वभूत गणामेय सौहार्दाय नमो नमः
मूकीभूतानेकलोक वाक्प्रदाय नमो नमः

शीतलीकृत हृत्ताप सेवकाय नमो नमः
भोग मोक्षप्रदानेकयोगज्ञाय नमो नमः
शीघ्रसिद्धिकरानेक शिक्षणाय नमो नमः
अमानित्वादि मुख्यार्थ सिद्धिदाय नमो नमः
अखण्डैक रसानन्द प्रबोधाय नमो नमः ६०
नित्यानित्य विवेक प्रदायकाय नमो नमः
प्रत्यगेकरसाखण्ट चित्सुखाय नमो नमः
इहामुत्रार्थ वैराग्य सिद्धिदाय नमो नमः
महामोहनिवृत्त्यर्थमन्त्रदाय नमो नमः
क्षेत्र क्षेत्रज्ञ प्रत्येक दृष्टिदाय नमो नमः
क्षयवृद्धि विहीनात्मसौख्यदाय नमो नमः
तूलाज्ञानविहीनात्म तुप्तिदाय नमो नमः
मूलाज्ञानबाधितात्ममुक्तिदाय नमो नमः
भ्रान्ति मेघोञ्चाटन प्रभञ्जनाय नमो नमः
शान्तिवृष्टि प्रदामोघ जलदाय नमो नमः ७०
एककालकृतानेकदर्शनाय नमो नमः
एकान्त भक्तसंवेद्य स्वगताय नमो नमः
श्री चक्ररथ निर्माण सुप्रथाय नमो नमः
श्री कल्याणतरामेयसुश्लोकाय नमो नमः
आश्रिताश्रयणीयत्व प्रापकाय नमो नमः
अखिलाण्डेश्वरीकर्णभूषकाय नमो नमः
सशिष्यगणयात्राविधायकाय नमो नमः
साधुसङ्ग नुतामेय चरणाय नमो नमः
अभिन्नामैत्क्यविज्ञान प्रबोधाय नमो नमः
भिन्नभिन्नमतैश्चाभिपूजिताय नमो नमः ८०
तत्तद्विपाक सद्बोधदायकाय नमो नमः
तत्तद्भाषा प्रकटित स्वगीताय नमो नमः
तत्र तत्र कृतानेक सत्कार्याय नमो नमः
चित्र चित्र प्रभाव प्रसिद्धिकाय नमो नमः
लोकानुग्रहकृत्कर्म निष्ठिताय नमो नमः
लोकोद्धृति महद्भूरि नियमाय नमो नमः
सर्ववेदान्तसिद्धान्त सम्मताय नमो नमः
कर्म ब्रह्मात्मकरण मर्मज्ञाय नमो नमः
वर्णाश्रम सदाचार रक्षकाय नमो नमः
धर्मार्थ काममोक्ष प्रदायकाय नमो नमः ९०
पदवाक्यप्रमाणादि पारीणाय नमो नमः
पादमूल नतानेक पण्डिताय नमो नमः
वेदशास्त्रार्थ सद्गोष्ठी विलासाय नमो नमः
वेदशास्त्र पुराणादि विचाराय नमो नमः
वेदवेदाङ्ग तत्त्वप्रबोधकाय नमो नमः
वेदमार्गप्रमाण प्रख्यापकाय नमो नमः
निर्णिद्र तेजोविजित निद्राढ्याय नमो नमः
निरन्तर महानन्द संपूर्णाय नमो नमः
स्वभाव मधुरोदार गांभीर्याय नमो नमः
सहजानन्द संपूर्ण सागराय नमो नमः १००
नादबिन्दु कलातीत वैभवाय नमो नमः
वादभेदविहीनात्म बोधदाय नमो नमः
द्वादशान्त महापीठ निषण्णाय नमो नमः
देशकालापरिच्छिन्न दृग्रूपाय नमो नमः
निर्मान शान्तिमहितनिश्चलाय नमो नमः
निर्लक्ष्य लक्ष्य संलक्ष्य निर्लेपाय नमो नमः
श्रीषोडशान्त कमल सुस्थिताय नमो नमः
श्री चन्द्रशेखरेन्द्र श्री सरस्वत्यै नमो नमः १०८

।। फलश्रुतिः ।।

इत्येतद्गुरुदेवस्य नाम्नामष्टोत्तरं शतम् । पठनात्पूजनाद्ध्यानाद्भक्तानामिष्टसिद्धिदम् ।।

।। सर्वं श्री गुरुदेवतार्पणमस्तु ।।

# ।। जगद्गुरु श्री चन्द्रशेखरेन्द्रसरस्वती स्वामिपादैः कृता प्रदोषस्तुतिः ।।

विश्वं विष्णू रुद्र विश्वाधिकोऽसि
यज्ञो विष्णुस्त्वं तु राजाध्वराणाम् ।
श्रीशःस्वर्णाद्री आत्म हस्ताग्रसंस्थौ
श्रीकण्ठोऽव्याद् देवताब्राह्मणोऽस्मान् ।।१।।

हालाहलं हर नियम्य परानियाम्यं
सर्वान् सुरान् सपदि यः स्वनतानरक्षत् ।
तृप्तानशिक्षत पुनर्युधि दक्षयज्ञे
स त्वं प्रभुः पशुपतिः प्रभुलक्षणोऽव्याः ।।२।।

गङ्गा धृता न भवता शिव पावनीति
नास्वादितो मधुर इत्यपि कालकूटः ।
संरक्षणाय जगतां करुणातिरेकात्
कर्मद्वयं कलितमेतदनन्यसाध्यम् ।।३।।

गङ्गा धृता त्वयेशान गङ्गादर्पोऽपि नाशितः ।
भगीरथानुग्रहार्थं लोका सम्भेदहेत्वे ।।

